"कारुण्यं भवभूतिरेव तनुते" (उत्तररामचरिते भवभूतिर्विशिष्यते)

"भवभूतेः कवीन्द्रस्य वाणी कामदुघा मता।
ब्रह्मानन्दसहोदर्यां या तनोति मुदं सदा॥"

भवभूतेर्जीवनवृत्तं नाट्यकृतित्वं च →

श्री भवभूतिः कान्यकुब्जेश्वरस्य श्रीमतो यशोवर्मण आश्रितो महाकविरित्यत्र सर्वेषां सुधियाम् ऐकमत्यम्। महाकविना बाणेन हर्षचरिते महाकविगणनाप्रसङ्गे नास्याभिधानम् अभ्यधायीति कवेर्बाणात् पूर्वं जनिकालमस्य नेति निर्णीयते। एवं भवभूतेर्जनिकालः ७०० ईसवीयस्य संनिधौ स्वीक्रियते। वैदर्भ प्रदेशस्य - पद्मपुरनगरवास्तव्योऽयं श्रीकण्ठपद-~~जननी~~-लाञ्छनो भवभूति-नामाऽभवत्। पितामहोऽस्य भट्टगोपालो, जनको नीलकण्ठो, जननी जातुकर्णी, गुरुश्च ज्ञाननिधिर्नाम। नाटकत्रयमस्य समुपलभ्यते - मालतीमाधवम्, महावीरचरितम्, उत्तररामचरितञ्च। व्याकरण-न्याय-मीमांसा-शास्त्रेषु निष्णातत्वादेव 'पद-वाक्य-प्रमाणज्ञः' इत्युपाधि-समलंकृतोऽभूत्। वेदेष्वन्येषु च शास्त्रेष्वस्य अव्याहता गतिः। वाग्देवी तं वश्येव समन्ववर्ततेति तथ्यं स्वयमेवोद्घोष्यते तेन। 'यं ब्रह्माणमियं देवी वाग्वश्येवानुवर्तते' (उत्तर० १-२)

भवभूतेः करुणो रसः →

करुणरसनिष्यन्दे नातिशेतेऽन्यो महाकविर्महाकविमभुम्। करुणरसोद्रेकम् आलोक्यैव कवेरेतस्य कृतिषु कृतिभिः

DATE: / /

कृतानि कतिपयानि प्रशंसापद्यानि। एतत्कृतकारुण्ये ग्रावाणोऽपि रुदन्ति, अन्येषां तु का कथा - 'भवभूतेः स

भवभूतेः संबन्धात् भूधरभूरेव भारती भाति।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ॥

कारुण्ये स कालिदासादप्यतिरिच्यते। अत उच्यते - 'उत्तरे रामचरिते भवभूतिर्विशिष्यते'।

एको रसः करुण एव →

करुण रसप्रवाहपरीक्षया चेन्नाटकत्रयमस्य तर्हि उत्तररामचरित एव सर्वातिशायि। यथाऽत्र करुणरस-निष्यन्दो, न तथाऽन्यत्र। किं कारुण्यम्? करुणरसस्य प्रवाह एव कारुण्यं इति। भवभूतिः करुणरसं रसत्वेनैव नातिष्ठतेऽपि तु समेषां रसानां मूलभूतत्वेन करुणमेवैकं रसं मनुते। आह च -

एको रसः करुण एव निमित्त भेदाद् -
भिन्नः पृथक् पृथगिव श्रयते विवर्तान्।
आवर्तबुद्बुदतरङ्गमयान् विकारान्,
अम्भो यथा सलिलमेव हि तत् समग्रम् ॥

कारुण्यं भवभूतिरेव तनुते →

संस्कृतवाङ्मये करुण रसवर्णने भवभूतेस्तत्स्थानं यद् शृङ्गाररसवर्णने कालिदासस्य। मानवीयमनोभावानां अन्तः स्थितेश्च यादृक् सूक्ष्मं मनोवैज्ञानिकं विश्लेषणं भवभूतिना

प्रस्तूयते, तदन्यत्र दुर्लभम् । स रामकथायां, प्राधान्येन सीता-परित्यागं आश्रित्य स्वीयां भावनां मूर्तरूपेणोपस्थापयति। तस्य वाचि तादृग् वीर्यं यथा न केवलं वृक्षवनस्पत्यादयः, अपि तु पर्वत-रोदन-क्षमताऽपि तस्य वाचि दरीदृश्यते।

भवभूतौ भावानां कोमलता, हृदयस्पर्शिता, तादात्म्यानुभूतिः, संवेदनशीलत्वं च वरीवर्ति, अतएव "कारुण्यं भवभूतिरेव तनुते" इति तस्य यशो जेगीयते।

यथा →

अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना,
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥

सीता-परित्याग सन्तप्तस्य रामस्य तादृश्येतावस्थाऽवर्त्तत यथा पुटपाकं कस्यचित् धातोः —

अनिर्भिन्नो गभीरत्वादन्तर्गूढव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः॥

परित्यक्तायाः शोकसन्तप्तायाः सीतायाः शरीरलावण्य विलीनम्। सा करुणस्य मूर्तिरिव, शरीरधारिणी विरहव्यथेव, हीना दीना क्षीणा चालक्ष्यते —

करुणस्य मूर्तिरथवा शरीरिणी,
विरहव्यथेव वनमेति जानकी ॥

Scanned with CamScanner

DATE: / /

सीताहरणचित्रदर्शनेन विषण्णस्य विलपतश्च दाशरथेरवस्थां वर्णयति कविः, बाष्पप्रसरं च मुक्ताहारेणोपमिमीते—

अयं तावद् बाष्पस्त्रुटित इव मुक्तामणिसरो
विसर्पन् धाराभिर्लुठति धरणीं जर्जरकणः।
निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया,
परेषामुन्नेयो भवति चिरमाध्मातहृदयः॥

शम्बूकप्रसङ्गेन दण्डकारण्यं पञ्चवटीं च प्राप्य जानकी-सहवासं स्मारं-२ खिद्यते तमां मनो मानिनो रामस्य। रामोऽभिधत्ते—

चिराद् वेगारम्भी प्रसृत इव तीव्रो विषरसः,
कुतश्चित् संवेगात् प्रचल इव शल्यस्य शकलः।
व्रणो रूढग्रन्थिः स्फुटित इव हृन्मर्मणि पुनः,
पुरीभूतः शोको विकलयति मां नूतन इव॥

पञ्चवटीदर्शनेन रामस्य दुःखाग्निरुद्दामं प्रज्वलति, मोहश्च तं सर्वथाऽऽवृणोति—

अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः।
उत्पीड इव धूमस्य मोहः प्रागावृणोति माम्॥

रामस्य सन्तापजां स्थितिं कथमिव कविः सजीवरूपेण चित्रयति। तस्य हृदयं शोकाद् विदीर्यते, परं न द्विधा द्विद्यते, मोहाजमेऽपि चैतन्यं नोज्झति, शोको देहं दहति,